**आचम्य** अव्य० आ+चम–ल्यप्। १आचमनं कृत्वेत्यर्थे आ+चम–कर्म्मणि यत्। २आचमनीये जलादौ त्रि०।

**आचय** पु० आ+चि–अच्। दूरस्थस्य पुष्पादेश्चयने। हस्तेन चयने तु घञ् आचाय इत्येव। तत्र नियुक्तः आकर्षादि० कन्। आचयकः आचितौ नियुक्ते त्रि०।

**आचरण** न० आ+चर–ल्युट्। १आचारे "अधीतिबोधाचरणप्रचारणैः" नैष०। "आचरत्यनेन करणे ल्युट्। २रथे ३शकटे च त्रि०। "यथा प्रयोग्य आचरणे युक्तः एवमस्मिन् शरीरे युक्तः" छा०उ०। "प्रयुज्यते इति प्रयोग्योऽश्वोबलीवर्द्दो वा आचरत्यनेन आचरणो रथोऽनो वा तस्मिन् आचरणे युक्तः तदाकर्षणाय, एवमस्मिन् शरीरे रथस्थानीये प्राणः पञ्चवृत्तिः इन्द्रियमनोबुद्धियुक्तः प्रज्ञात्मा विज्ञानरूपक्रियामूर्च्छितात्मा युक्तः स्वकर्म्मफलोपभोगनिमित्तं नियुक्तः ईश्वरेण राज्ञेव सर्वाधिकारे दर्शनश्रवणचेष्टाव्यापारेऽधिकृत" इति श०भा०।

**आचरित** न० आ+चर-भावे क्त। १आचारे "वाग्देवताचरितचित्रितचित्त सद्मा" जयदेवः। २ऋणिकादृण ग्रहणोपायभेदे। "धर्मेण व्यवहारेण छलेनाचरितेन च। प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च" मनुः। "तत्र ऋणिको यदि निःस्वो व्यवहारेण दापयितव्यः अन्यत् कर्म्मोपकरणं धनं दत्त्वा कृषिबाणिज्यादिना व्यवहारयितव्यः तदुत्पन्नं धनं तस्मात् गृह्णीयादिति" मेधा०। छलाचरितबलान्याह बृह०। "छद्मना याचितं चार्थमानीय ऋणिकाद्धनी। अन्याहृतादि व्याहृत्य दाप्यते तत्र सोपधिः। दारपुत्रपशून् हृत्वा कृत्वा द्वारोपवेशनम्। यत्रार्थोदाप्यतेऽर्थं स्वं तदाचरितमुच्यते। बद्ध्वा स्वगृहमानीय ताड़नाद्यैरुपक्रमैः। ऋणिकोदाप्यते यत्र बलात्कारः स उच्यते" कुल्लू० धृता। कर्मणि घञ्। २अनुष्ठिते त्रि०। "जलं वामकरे कृत्वा या सन्ध्याऽऽचरिता द्विजैः" काशी०।

**आचरणीय** त्रि० आ+चर–अनीयर्। अनुष्ठेये "यद्यपि शुद्धं लोकविरुद्धं नाचरणीयं नाचरणीयमिति" स्मृतिः। तव्य। आचरितव्यमप्यत्र त्रि०।

**आचर्य्य** न० आचर्य्यतेऽत्र आ+चर–आधारे यत्। अनुष्ठानयोग्ये देशे "आश्चर्यमनित्ये" पा० सू० उक्तेः आश्चर्य्यम्। अद्भुते त्रि०।

**आचान्त** त्रि० आ+चम–क्त। आचमनकर्त्तरि "१आचान्तः पुनराचामेत्" काशी० स्मृतिश्च। कृतमाचमनं यस्य तादृशे २ जलादौ च "आचान्तोदकाय गौरिति नापितस्त्रिब्रूयात्" सत० गोभिलसूत्रम्।

**आचाम** पु० आ+चम-भावे घञ् वा वृद्धिः। आचमने कर्म्मणि घञ्। २भक्ष्ये ३भक्तनिस्रावे मण्डे (माड़) "पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासः स्यात् कृच्छ्रः सौम्योऽयमुच्यते" या०। पिण्याकः निसृततैलस्तिलः अदननिस्रावोदश्विदुदकसक्तूनां पञ्चानामेकैकं प्रतिदिवसमुपभुज्य षष्ठेऽह्नि उपसेदिति" मिता०। "पिण्याकः खलिः आचामः भक्तमण्डः" प्रा०वि०। "आचाममथ पिण्याकं तक्रञ्चोदकसक्तुकान्। त्र्यहं त्र्यहं प्रयुञ्जानोवायुभक्षस्त्र्यहद्वयम्। एकविंशतिरात्रैस्तु तुला पुरुष उच्यते" यमः। ४सौत्रामणीयागाङ्गे सुरासाधने भक्तमण्डे च "कृत्वा तांश्च व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य चूर्णैः संसृज्य निदधाति तन्मासरम्" कात्या० १९,१,२०। "दक्षिणेन द्वारेण प्रवेश्याग्न्यागारं नग्नहुचूर्णानि कृत्वा। लग्नहुः किण्व उच्यते। तांश्च शष्पादीं चूर्णयित्वा व्रीहिश्यामाकौदनयोः पृथगाचामौ निषिच्य चूर्णैः संसृज्य निदधाति तन्मासरमुच्यते। व्रीहियवाभ्याञ्च सुरा निष्पाद्यते सा च यागसाधनम् तेन सा तद्धर्म्मैरभिसंबध्यते। अतस्तयोश्चतुर्मुष्टिग्रहणपूर्व्वकं पृथगोदनौ निष्पाद्येते। नग्नहुद्रव्याण्याह। "सज्जत्वक्त्रिफला चैव शुण्ठी चैव पुनर्नवा। चतुर्ज्जातकसंयुक्ता पिप्पली गजपिप्पली। वंशोऽवका वृहच्छत्रा चित्रकं चेन्द्रवारुणी। अश्वगन्धां समुत्पाद्य मूलान्येतानि निर्द्दिशेत्। धान्यकं च यवानीं च जीरकं कृष्णजीरकम्। द्वे हरिद्रे वचा चैव विरूढा व्रीहयो यवाः"। क्रयणानन्तरं शष्पादीन्यादाय दक्षिणेन द्वाराग्न्यागारं प्रवेश्य लग्नहुचूर्णानि कृत्वा सज्जत्वगाद्यौषधानि तूष्णीं पिष्ट्वा तान् शष्पतोक्मलाजान् चूर्णीकृत्य दर्शपार्णमासधर्मेण पात्रासादनादि। श्यामाकचतुर्मुष्टिकग्रहणपूर्व्वकं फलीकरणान्तं समन्त्रकं कृत्वा वहुतरोदके पृथक् पृथक् चरू पक्त्वा घृतालम्भनानान्तं व्रीहिश्यामाकौदनयोः पृथगाचामौ परिषिच्य पृथग्भिन्नयोः पात्रयोश्चर्व्वोर्मध्यादतिरिक्तमुष्णोदकम् (मण्डम्) अवस्राव्य तदुदकं (मण्डम्) लग्नहुप्रभृतिभिश्चतुर्भिश्चूर्णैः संसृज्य निदधाति स्थापयति तन्मासरं तस्य चूर्णसंसृष्टस्याचामस्य मासरमिति संज्ञा" "एवमाचामयोश्चूर्णसंसर्गानन्तरमिति" च कर्कः। सौत्रामणीशब्दे तदीयसुरासाधनसंस्कारप्रकारोवक्ष्यते

**आचार** पु० आ+चर–भावे घञ्। १आचरणे अनुष्ठाने स च